।। शिवाभ्यां नमः ।।

# ।। गङ्गाष्टकम् ।।

श्रीविष्णुपादसम्भूते शम्भुमूर्ध्नि निवासके।

द्विजानां प्रत्ययार्थञ्च कूपादस्मात्समुद्भव ॥ १

स्मरणात्पापशमने पीते सुज्ञानदायिनि ।

शम्भुमूर्ध्नि सदा भासे कूपादस्मात्समुद्भव ॥ २

जगतामघनाशाय भुवनत्रयवाहिनि ।

जाह्नवीति च विख्याते कूपादस्मात्समुद्भव ॥ ३

भगीरथप्रयत्नेन सम्भवे भुवने ततः ।

भागीरथीति विख्याते कूपादस्मात्समुद्भव ॥ ४

वन्दे वाराणसीवासां वन्दे पतितपावनीम् ।

वन्दे त्रिपथगां गङ्गां वन्दे त्वां कूपसम्भवाम् ॥ ५

तव कल्लोलपूरैश्च त्वं ग्रामं विश शोभने ।

ब्राह्मणानां सुबोधाय मद्वाक्यं सफलं कुरु ॥ ६

उपसंहर पूरञ्च कूपे तिष्ठ सुमङ्गले ।

भूयान्मातस्तव ख्यातिः कूपस्थानोद्भवेति च ॥ ७

सहस्रमुखसङ्कीर्णे शतशब्दविलम्बिनि ।

मामुद्धरापदम्बोधेः नास्ति मे गतिरन्यथा ॥ ८

एतत्स्तवञ्च यज्जिह्वा पठतः श्रृणुते शुचिः ।

सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥ ९

एतद्ग्रामस्थकल्याणस्थैर्यार्थं जगदीश्वरि ।

तवापि कूपतोयेस्मिन् स्थैर्यं भवतु कामदे ॥ १०

प्रतिदर्श च तोयेस्मिन् विशेषाद्वृश्चिके शुभे ।

भक्त्या ये तु प्रकुर्वन्ति स्नानं तान्यावयानघे ॥ ११

वाराणस्यान्तु विश्वेशसन्निधौ तनुमार्जनम् ।

कुर्वतां यत्फलं मातस्तदत्रापि प्रयच्छ नः ॥ १२

भगीरथमनोभीष्टसिद्धये भुवनाश्रिते ।

ब्राह्मणानां मनःपूत्यै मम कूपे स्थिरा भव ॥ १३

शम्भो भवन्नामनिरन्तरानुसन्धानभाग्येन भवन्तमेव ।

यद्येष सर्वत्र तथान्त्यजेऽद्य पश्यत्यहो कोऽत्र कृतोऽपराधः ॥ १४

अस्त्वेष मन्तुः पितृयज्ञनिष्ठे गङ्गाप्लवो यो विहितोऽपचित्यै ।

दूरात्तु तन्नामजपेन शुद्धिः न स्यात् कथं मे स्मृतिरर्थवादः ॥ १५

त्वन्नामनिष्ठा न हि तावती मे श्रद्धा यतः कर्मसु न प्रदग्धा ।

त्रैशङ्कवं मे पशुपान्तराय: मुच्येय तस्मात्कथमार्तबन्धो ॥ १६

यद्यद्य ते श्राद्धविनष्टिरिष्टा कोऽहं ततोऽन्यच्चरितुं समर्थः ।

श्राद्धे वृताः पूर्वदिनोपवासाः नान्यत्र भुञ्जीयुरिदं तु खिद्ये ॥ १७

श्रद्धालव: श्राद्धविघातभीत्या स्वात्मोपरोधं विगणय्य धीराः ।

यत्प्रोचुरत्रापचितिं महान्तः तत्रोचितं यद्दयया विधेहि ॥ १८

गङ्गाधर त्वद्भजनान्तरायभीत्या गृहे कूपकृतावगाहः।
जाने न तीर्थान्तरमद्य गङ्गाम् आसादयेयं कथमार्तबन्धो ॥ १९

नाहं तपस्वी सगरान्ववायः जाने न जह्नुः चरति क्व वेति।
शम्भो जटाजूटमपावृणुष्वेत्यभ्यर्थने नालमयं वराकः ॥ २०

गङ्गाधराख्या गतिरत्र नान्या तामाश्रये सङ्कटमोचनाय।
हन्त प्रवाहः कथमत्र कूपे विस्फूर्जतीशः खलु मे प्रसन्नः ॥ २१

गङ्गेति गङ्गेति हरेति गृह्णन् आप्लावितोऽहं दयया पुरारेः।
कूपोत्थितोऽयं करुणाप्रवाहः गाङ्गश्चिरायात्र जनान् पुनातु ॥ २२

।। इति श्री श्रीधरवेङ्कटेशार्य कृत गङ्गाष्टकं सम्पूर्णम् ।।